श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकविचन्द्र विनिर्मिता

# ॥ श्री कटाक्षषोडशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कटाक्षषोडशी ॥

संभावयन् विधिशिवौ सकृदिन्दिरायाः
    वक्त्रारविन्दपरिरम्भकरः सुरस्पृक्।
मज्जन् मुहुः स्वशरणेषु निपत्य मग्नो
    दीनेषु रक्षतु स मां भगवत्कटाक्षः॥ 1 ॥

मज्जन् दयामयसुधाम्बुनिधौ जगत्या -
    मत्यादरेण परिरभ्य करीन्द्रमार्तम्।
कुम्भीरमाप परुषाकृतिमेव रोषात्
    यः पातु जातु विशदो भगवत्कटाक्षः॥ 2 ॥

रक्तः स्वयं सलिलराशिसुतास्यबिम्ब -
    सम्भावनासु शुचिरार्तजनप्रसादे।
अम्भोजनिःसरदलिप्रकरानुकारी
    चित्रश्चिरादवतु मां भगवत्कटाक्षः॥ 3 ॥

दुःखप्रवाहपरिणाहविगाहनोद्य -
    त्सन्तापमादृशविवर्जनदुर्यशोभिः।
संलिप्तमूर्तिरिव मेचकरोचिरव्या -
    दव्याजरक्षितजगद्भगवत्कटाक्षः॥ 4 ॥

पद्मालयावदनमण्डलनेत्रयुग्म -
    च्छद्मोल्लसद्विकचपद्मविहारलुब्धः।
मुग्धो मधुव्रतसमूह इव प्रसर्पन्
    श्रेयः समर्पयतु मे भगवत्कटाक्षः॥ 5 ॥

पातानुभावपरिपावितपातकाध्व -
पान्थाधिकाररहितान्तकदर्शिताधिः।
दुःखाभिभूततरभूतचयानुभूतौ
दायस्तनोतु कुशलं भगवत्कटाक्षः ॥ 6 ॥

मन्दारमुख्यसुरवृक्षवदान्यभावः
सन्ध्यास्फुटीकृतबहुप्रवणार्थिवन्द्यः।
निष्कामभक्तजनसात्कृतनित्यधामा
कामाय संभवतु मे भगवत्कटाक्षः ॥ 7 ॥

न्यस्तात्मभारभरणादरभाव्यमान -
वृत्तिप्रवृत्तिपरतन्त्र इव प्रवृत्तिः।
सद्वृत्तिधूर्तविषयाधिकतोषरोष -
संलक्षितो भगवतोऽवतु मां कटाक्षः ॥ 8 ॥

दुर्वारमारशरवार इवातिधीर -
वाराङ्गनाहृदयदुर्जयधैर्यभेदी।
सत्पक्षयोगविहितद्रुतगत्यनिन्द्यो
निन्द्यां मतिं हरतु मे स हरेः कटाक्षः ॥ 9 ॥

निर्व्याजदृष्टिकरुणामृतवृष्टिहृष्ट -
पुष्टत्रिलोकगतकोकविलोकनीयः।
दिव्याम्बुवाह इव सक्षणरुग्विलासः
तापत्रयं हरतु मे स हरेः कटाक्षः ॥ 10 ॥

यस्मिन् समुल्लसति कामधुगल्पदो वा
कल्पद्रुरल्पफलपुष्प इवास्तु कल्पः।
चिन्तामणिर्मणिगणैर्गणनीयभाग्यः
कामं स पूरयतु मे भगवत्कटाक्षः ॥ 11 ॥

अन्तर्निरन्तरवलद्विमलानुकम्पा -
संस्पर्धमानमहिमानगृहीतभक्तः।
अग्राध्वजाग्रदतिवेललसत्तितिक्षः
क्षेमं तनोतु नितरां भगवत्कटाक्षः॥ **12** ॥

इन्दीवरोदरमनोहरमन्दिरान्त -
र्वास्तव्यकान्तिरमणीपरिरभ्यमाणः।
कश्चिद्विपश्चिदनुभूतमहाप्रसादः
सीदन्तमुद्धरतु मां भगवत्कटाक्षः॥ **13** ॥

ध्यायन्निकायनिरपायकृपौघयुक्तो
मुक्तोपभुक्तमहिमामृतसिन्धुबिन्दुः।
कामप्रकामफलदाननिदानकल्प -
वृक्षोपमः फलतु मे भगवत्कटाक्षः॥ **14** ॥

यस्यानुकूल्यबहुमूल्यमनोज्ञरत्न -
भूषाविभूषिततनुस्तनुजाम्बुराशेः।
भूरप्यभूदतुलसौभगयोगयोग्या
भूयात् स भूरिविभवाय विभोः कटाक्षः॥ **15** ॥

इन्दीवरैरिव किरन् रुचिभिः समन्तात्
बृन्दावनान्तरमनन्तगुणास्पदं यः।
आनन्दयत्यनुदिनं व्रजसुन्दरीणां
चेतांसि मेऽस्तु सुखदः स हरेः कटाक्षः॥ **16** ॥

कटाक्षषोडशी सेयं कविचन्द्रविनिर्मिता।
कलेव कृष्णचन्द्रस्य करोतु जगतां मुदम्॥ **17** ॥

॥ इति श्री कटाक्षषोडशी समाप्ता॥